# उपनिषत्सु विश्वबन्धुत्वम्

**Dr. TOMEER SHARMA**

**Govt. Sanskrit Teacher HP.**

उपनिषत्सु विश्वबन्धुत्वभावनायाः तथा च समदर्शितायाः संदेशः सर्वप्रथमं ईशावास्योपनिषदि एव प्राप्यते। अत्रोपनिषदि प्रतिपादितमस्ति यः सर्वप्राणिषु समदर्शितायाः एकत्वस्य वा भावम् उपस्थापयति तदा स न कस्मादपि घृणितः भवति अर्थात् घृणां प्राप्नोति।

**यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।**

**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते[1]।।**

अस्मिन् मन्त्रे ऋषिभिः समग्रदृष्टिं संस्थाप्य एकात्मभावस्योपदेशः प्रति मानवकल्याणाय प्रकीर्तितः। यदा मोहमायायां संलिप्तः मानवः अस्मिन् दृश्यमानजगति एकात्मभावेन व्यवहरति तदा स न कस्मादपि विजुगुप्सते। यत्र स्वामित्वस्य भावना तत्र कलह: इर्षा , द्वेषः, घृणा च जायते। अतः चिन्तनीयमस्ति यत् नास्ति अस्माकमत्र किमपि तस्यैव ईश्वरस्य सर्वम्, न च व्यक्तिगतस्वामित्वं कस्यापि, स्वामित्वदृष्ट्या वयं सर्वे समाः। य एवं पश्यति धीरपुरुषः स न विजुगुप्सते। विश्वेऽस्मिन् इर्षा-द्वेष-घृणा-स्पर्धाजन्य: कलह: कथं सर्वदाभवति? यतोहि अस्मादन्यः कोऽपि अत्यधिक-सम्पन्नोऽस्ति, केषाञ्चित् पार्श्वे तु न किमपि। कर्माणि कुरु, परं कर्माणि कुर्वन् यां कामपि धनसंपदाम् उत्पादये तां त्यागभावेन धरोहररुपेण ट्रस्टरुपेण च स्वस्य पार्श्वे संस्थापयेत् न च स्वामित्वभावेन। यदि एवं विश्वेऽस्मिन् मानवस्य दृष्टिः स्यात् तदा विश्वेऽस्मिन् शान्तेः सौहार्दस्य च वातावरणमागामिष्यति। सर्वे प्राणिनः अस्यां धरायां परस्परं मिलित्वा जीवनं यापयिष्यन्ति। प्रेम-घृणा च एतौ भावद्वावेव स्तः, यौ क्रमशः मानवे मानवतां उद्भावयत: दानवतां च उद्भावयत: धनसम्पदा मम एव, इत्ययं भाव: घृणायाः द्वारम् उद्घाटयति। न मम न च तव इति भाव: प्रेम्णः द्वारम्

---

[1] ईश०उप० म० ६

उत्पादयति? परम् एषः भावः कदा समुत्पद्यते इत्ययं प्रश्नः विचारणीयः? एष भावः तदैवोत्पद्यते यदा स्वात्मानं प्रति या दृष्टिः तथैव परात्मानम् प्रति अपि स्यात्। एषा भावना यदा अनुभवे आगमिष्यति तदा जीवने क्रियान्विता भविष्यति तदा समाजे अखिले विश्वे प्रेमणः एकच्छत्रसाम्राज्यं स्थापितो भविष्यति, तथा च सम्पूर्णेविश्वे शान्तिः स्थापिता भविष्यति। अस्यां श्रुतौ प्रेम-घृणयोः मनोवैज्ञानिकाधारः उद्घाटितोऽस्ति। यदि समाजस्य रचनायाः **"तेन त्यक्तेन भुञ्जीथा[2]"** इत्यस्य आध्यात्मिकरसः सन्निविष्टो स्यात् तदा प्रेममात्रस्य साम्राज्यं भविष्यति। तदैव महाभारते अपि उक्तं-

**आत्मनः विपरीतानि परेषां न समाचरेत्[3]**

स्वामिश्रीविवेकानन्दस्याध्यात्मिकादर्शभावः समाजे प्रसारितः, तेन महानुभावेन ऐश्वरीयप्रेमसेवयाः स्वरूपप्रकाशनस्यज्ञानं मानवहृदयेषु प्रकटिकृतम् । ते कथयन्ति- **'त्यागभावः सेवाभावः च भारतस्य आदर्शयुग्मौ स्तः। एतयोः एव सन्देशः समाजे तीव्रवेगेन प्रेषणीयम्'[4]।** यदा त्यागसेवाभावयोः आत्मीकरणं भविष्यति तदा एव वेदान्तिकचरित्रस्य समृद्धिं धीरतां च प्राप्तुं शक्नुमः। त्याग एव ईशावास्योपनिषदः प्रथममन्त्रस्य विषयः-

**'तेन त्यक्तेन भुञ्जीथाः[5]'** साङ्ख्स्यापि कथनमिदं यत् प्रकृतिः उपभोगाया परं कथमुपभोजनीया इत्ययं विचारः कृतोऽत्र। उपभोग्यां प्रकृतिं त्यागपूर्वकं भोगेनैव जीवनस्य रसः आस्वादनीयः। न च ममत्वभावेन। तुच्छं तामसाहं अहङ्कारं परित्यज्य उत्कृष्टं चिन्तनं करणीयम्। स्वस्य वास्तविकं स्वरुपं सत्यस्वरुपं जानन् स्वात्मानं अन्यत्र जीवेषु अनुभूय आत्मवत्सर्वभूतेषु इति धीया सर्वत्र एकतामनुभवतु। सर्वेषां प्राणिनां कृते

---

2 ईश०उप०-मन्त्र २

3 महाभारतम्

4 कम्प० वर्क्स भाग-५.१५

5 ईश०उप० म०२

स्वस्मिन् सेवायाः भाव उत्पादनीयः। एतादृशी अपेक्षा सभ्यसमाजतः कृता अस्ति। यदि एवंभूतः मानवः आचरेत् तदा सर्वत्र सर्वे वास्तविकलक्ष्यं प्रति अग्रेसरेन।

यदा वयम् एतादृश-अपेक्षायाः पूर्तिं कुर्मः तदा अस्माकम् आचरणे विशिष्टं सौन्दर्यं प्रतिष्ठापितं भवति। जीवनसौन्दर्यस्य विलोमं यदि पश्यामः तदा स्वार्थपरतां तथा शोषणं द्रष्टुं शक्नुमः। यः मनुष्यः स्वार्थी तथा च शोषणवृत्तियुक्तः, स न कदापि जीवनस्योच्चं तथा श्रेष्ठं लक्ष्यं प्राप्तुं शक्नोति। न च जीवने संयम-दृष्टिं प्राप्तुं शक्नोति। एवं प्रतीयते यत् स्वाधीनतायाः पश्चात् अस्माकं सामाजिके जीवने स्वार्थपरतायाः तथा शोषणवृत्त्याः वृद्धिः जाता अस्ति। राजनैतिक-स्वतन्त्रतया सह अस्माकं क्षुद्रवृत्तीनामपि वृद्धिः जाता अस्ति। असंयमे अनुशासनहीनतायां च वृद्धिः जाता, कस्यापि दुःखीजनसहायस्य दृष्टिः लुप्तप्राया जाता। एतेन कारणेन सामाजिकासन्तोषः उत्पन्नं जातम् अस्ति, अपि च वयं सामाजिककल्याणस्य उद्देश्यं विस्मृतवन्तः। भारतीय-शास्त्रेषु या अस्ति विद्या आध्यात्मिक-न्यासरुपेण सा विद्या कदा पर्यन्तंम् अस्माकं मस्तिष्के मनसि च स्थिता भविष्यति। आवश्यकमिदमस्ति यत् अद्य वर्तमाने काले एतादृशी शिक्षायाः आवश्यकता विद्यते या मानवेषु मानवता निर्मातुमर्हति **“सर्वभूतेषु चात्मानं”**[6] आदर्शेन यदि एवंभूतः मानवः सर्वादौ सर्वथा एकात्मभावदृष्टयोपपन्नः स्यात् तदा विश्ववन्धुत्वस्थापनं स्यात्। अन्यथा सर्वत्र समाजे कलहः विवादादीनां वातावरणं स्यात्।

क्रूसः तथा च हिलासः अखिलजगति परस्परं कलहं कृतवन्तः। भारतीयप्रसंगेऽस्मिन् बहुव्यापकं परिवर्तनं जायमानमस्ति। यदा भारतीय-ईसाईधर्मः तथा भारतीय-इस्लामधर्मः स्व विशुद्धम् आध्यात्मिकं स्वरुपं ज्ञास्यन्ति तदा ते सुव्यक्तराष्ट्रिय अन्तर्राष्ट्रियाध्यात्मिक्यः शक्तयः एकीभूय अन्योऽन्यसम्बन्धेन व्यापकरुपेण सम्बन्धं स्थापयितुं समर्थाः भविष्यन्ति। तदा भारतस्य कृते तस्य पराक्रमस्य पर्यावसानं भविष्यति एतत्सर्वं स्वामिविवेकानन्देन ‘भारतस्य स्व विकीर्णाध्यात्मिकशक्तीनां सम्मेलनं’ इत्युक्त्या उल्लेखः कृतः अस्ति। भारतीयसंविधानं भारतीयराष्ट्रं च भावपूर्णावेगेन सह स्वतन्त्रतायाः आदर्शेन प्रतिबद्ध

[6] ईश०उप० म०६

अस्ति। विचाराणामन्तर्भावानां स्वतन्त्रतां स्ववर्णितधर्मानुपालनस्य स्वातन्त्र्यं विना धर्मनुपालनं, जीवनस्य स्वातन्त्र्यं सिद्धिकर्तुं विवेकानन्देनोक्तं- 'वृद्धयर्थं स्वतन्त्रता एक एव नियमोऽस्ति'। व्यवहारिकवेदान्तभाषणमालायां स्वामिविवेकानन्देन भावपूर्णशब्दैः लन्दननगरे १८९६ तमे ईश्वीये वर्षे उक्तम् यत्- 'तर्कस्य जीवने महत्त्वपूर्णं योगदानमस्ति। यदि कोऽपि तर्काधारेण नास्तिको स्यात् तदा अहं कस्यचिदपि धर्मान्धस्यापेक्षया तं तर्कानुगामिनं श्रेष्ठं ज्ञास्यामि। तर्कसमं नास्ति किमपि प्रमाणम्'। यदुक्तं- **"यस्तर्केणानुसन्धते स धर्मवेद नेतरः"**[7] इति अस्मान् प्रगतेः विकासस्य अनुभूतेश्चावश्यकता अस्ति। न च केनापि सिद्धान्तेन मानवस्योन्नतिः लिपिवद्धाऽस्ति, न च केनाऽपि पुस्तकेन मानवः पुततां प्राप्नोति। उन्नतिः पवित्रता च केवलं स्वानुभुत्यैव लभ्यते। अनुभूत्याश्च स्रोतोऽस्ति मननम्। अतः अवश्यं मननं कर्त्तव्यम्[8]। मानवस्य महत्त्वं विशिष्टं च तस्य चिन्तनेनैवास्ति। मानवस्य स्वभावैव एतत् चिन्तनम्। चिन्तनेनैव पशुमानवयोः भेदः। अतः अहं तर्कोपयुक्तं जीवनं श्रेष्ठं जानामि[9]। भारतीयाशासनपद्धतौ मौलिकस्वातन्त्र्यस्य प्रामाण्यं भारतीयनागरिकाणां सर्वविधविकासाय एव। भारतवर्षे विश्वजनतायाः सप्तमो भागो निवसन्ति। एतेषां सर्वेषां जनानां चिन्तनं तथा नेतृत्वस्य पथप्रदर्शनं तथा च स्वतन्त्रता- माध्यमेन तस्य व्यक्तित्वस्य पवित्रतायाः परिरक्षणं च महत्त्वपूर्णमस्ति।

१९४९ तमे ख्रिष्टाब्दे वर्षे संविधानस्य निर्मातृपरिषदेन भारतस्य संविधानाय स्वीकृतिः प्रदत्ता। अत्र परिषदि अधिकसंख्यकाः सदस्याः धर्मानुयायिनः आसन्। तदाऽपि तैः स्वातिधर्मपरायण-देशाय लौकिकीकरणस्य नीत्याः तथा च सिद्धान्तानां वरणं कृतम्। अस्माभिः एतस्य महत्ता स्वीकर्त्तव्या। डॉ० राधाकृष्णेन एतैः शब्दैः एतस्य महत्त्वं प्रतिपादितम्।

---

[7] मनु०स्मृ०अ०२ श्लो०१४४

[8] कम्प० वर्क्स भाग-२ पृ०३३६ स्वा० वि०

[9] कम्प०वर्क्स० भाग-२ पृ०३३६ स्वा० वि०

यद्यपि ईश्वरे विश्वासः अस्माकं परम्परायाः मूलम् **"ईशावास्यमिदं सर्वं यच्किञ्च"**[10] अस्ति तथापि भारतस्य शासनं न तु केनापि धर्मविशेषेन तादात्म्यं स्थापयिष्यति, न च तस्य हस्ते प्रशासनस्य सत्तां समर्पयिष्यति। भारतीय-शासनस्य एषः दृष्टिकोणः सर्वधर्म-समन्वयेन-समभावेन, उदारतया सहिष्णुतया च युक्तोऽस्ति। राष्ट्रियान्ताराष्ट्रियस्तरे विशिष्ट-भूमिकायाः संकेतोविद्यते। एवं अनेकतायामेकतायाः भावः प्रसारितः, तस्मिन् भ्रातृभावः एव समाहितः, तेनैव समाजे रचनात्मकतायाः प्रारम्भो भवति[11]। एतादृशः ' सेक्युलरः' राष्ट्रः न कदापि च धर्मं प्रति उदासीनो भविष्यति, न च धर्म-विरोधीन्याः नास्तिकतायाः पोषको भविष्यति। एतादृश-राज्यस्य विश्वासो अस्ति यत् व्यक्तित्वस्य यत्र आधिभौतिकं मूल्यमस्ति तत्र आध्यात्मिकमपि मूल्यं स्थास्यति। एतादृशराष्ट्राय वेदान्तिकराष्ट्र इति संज्ञा उपयुक्तास्ति। यतो हि तस्य पृष्ठभूमौ औपनिषदिकी प्रेरणा सहिष्णुता तथा सर्वग्राह्यतायाः आधारः अस्ति। उक्तञ्च उपनिषदि- सर्वभूतेषु चात्मानम्[12]। विश्वस्येतिहासे एतादृश सर्वग्राह्यतायाः देशस्य परिचयो न प्राप्यते। एतत्तु सत्यमस्ति यत् भारतस्येतिहासे एतादृश-महत्-शासकानां न्यूनता नासीत् ते शासकाः सहिष्णुतायाः मुर्त्तयः परधर्मं प्रति उदाराः चासन् तत्रापि एक एव धर्मः राजकीय-मान्यतया स्वीकृत: आसीत्। तद्भिन्नं पश्चिम-देशेषु एतादृश-राष्ट्राणां दर्शनं प्राप्यते सर्वधर्माणां ते सम्मानं कुर्वन्ति स्म, परं स्व-राजनैतिकोद्देश्य-प्राप्त्यर्थं सर्वधर्मेषु उदासीना; भवन्ति स्म। एषा एव वार्ता विशिस्य रोमनदेशे प्रभावयुक्ता भवति। संयुक्तराज्यस्य अमरीकायाः शासनं वर्तमानकालिनभारतीयधारणायाः समीपेऽस्ति। तत्र राज्याय विश्वासः, ईश्वरे धर्मणि च विश्वासः सत्सु राज्यस्य संचालने चर्चस्य न कश्चिदपि हस्तक्षेपः। परं तेषां राजनैतिकदर्शनं न कस्यापि व्यक्तित्वस्य आध्यात्मिकमूल्येन सह सम्बद्धो विद्यते। तेषां सम्बन्धस्तु व्यक्तेः सामाजिकाचरणेनैव अस्ति। वास्तविकतायां यदि व्यक्तेः बाह्यमूल्येन सह आध्यात्मिकमूल्यस्य सम्बन्ध: स्थापितो न स्यात् तदा समग्रतायाः दर्शनं न जायते। वेदान्तस्य एष एव समग्रदृष्टिकोणः वर्तते। अयं दृष्टिकोण: उन्नतिपथे

---

10 ईश०उप० म०१

11 डॉ० राधाकृष्णन् 'रिकवरी ऑफ फेथ' पृ० २०२

12 ईश० उप० म० ५

अग्रेसारयति। उक्तं च ईशोपनिषदि- **'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते'**[13]। अधुना कलहयुक्तपरिवेशो दृश्यते। विश्वमानवकल्याणाय प्रकृतेः समग्रदृष्ट्या अवबोधनस्यावश्यकता अस्ति। विश्वे मानवकल्याणाय मानवदर्शनस्य जीवने अनुपालनाय आवश्यकता अस्ति यत् कर्म तथा ध्यानम् उद्यमस्य-पूजायाः-लौकिकस्यालौकिकस्य च भेदं समापयेत्। एष उपनिषद्-दर्शनमेव अस्ति यत् सर्वाणि भेदानि उत्पाटयितुं समर्थम्। यथोपदिष्टम् ऐक्यभावमभिलक्ष्य-

**एको देवः सर्वभूतेषु गूढ: सर्वव्यापी सर्वभूतान्तरात्मा।**

**कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च**[14]**।।**

**य एकोऽवर्णो बहुधा शक्तियोगाद्**[15]**।**

**यस्तु सर्वाणि भूतानि आत्मन्येवोनुपश्यति**[16]**।**

**असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्माऽमृतं गमय**[17]**।**

**इत्यादिः ।।**

अत्र उपनिषद्वाक्येषु परमप्रामाण्येन विश्वकल्याणाय विश्वबन्धुत्वभावनायाः उत्कृष्ट- सन्देशः प्राप्यते।

13 तत्रैव-मन्त्र ११

14 श्वे०उप०-६.११

15 तत्रैव- ४.१

16 ईश०उप०-मन्त्र ६

17 बृह०उप०-१.३.२८